S 821.08 PAK
BUL-JB
85295
BUL-JB

कविराक्षसकृतः

सूक्तिसंग्रहः ।

काशीनाथ पाण्डुरङ्ग परब

इत्यनेन संस्कृतः ।

स च

मुम्बय्याम्

तुकाराम जावजी इत्येतेषां निर्णयसागरमुद्रणयन्त्रालयाधिपेन पाण्डुरङ्ग जावजी इत्यनेन मुद्रयित्वा प्रकाशितः ।

ख्रिस्ताब्दाः १९३०.

मूल्यम् १ आणकः ।

NIRNAYA SAGAR PRESS
Revised
0-2
BOMBAY
BANGALORE UNIVERSITY LIBRARY
BANGALORE

085295
S821.08
RAKs P

Published by Pandurang Jawaji, and Printed by Ramchandra Yesu Shedge, at the "Nirnaya-Sagar" Press, 26-28, Kolbhat Lane, Bombay.

॥ श्रीः ॥

कविराक्षसकृतः ।

सूक्तिसंग्रहः ।



प्रथमा पद्धतिः ।

त्रयीयुवतिसीमन्तसीमासिन्दूरबिन्दवः ।
संसाराब्धिं तरेयुर्वः कंसारेः पादपांसवः ॥ १ ॥
सुपार्थिवैश्च पद्मैश्च सर्वतोमुखभूतिभिः ।
प्रसारिते मित्रकरे त्यज्यन्ते कोशसंपदः ॥ २ ॥
हतकामं चिरं लोकं प्रभोरुग्रस्य वीक्षणात् ।
कुर्याद्यो निजया लक्ष्म्या सकामं परमः पुमान् ॥ ३ ॥
विशिष्टं सर्वभूतेभ्यः श्रोतव्यं गुणवत्तया ।
न त्यजेद्विभुता नित्यमाकाशमिव भूमिपम् ॥ ४ ॥
काले मृदुश्च तीक्ष्णश्च नृपः स्याद्यदि सूर्यवत् ।
उदयः क्रियते तस्य मण्डलेनानुरागिणा ॥ ५ ॥
नलिनानां नृपाणां च श्रियं हि महतामपि ।
मित्रप्रतापो भूयोऽपि वर्धयत्यनिशोज्ज्वलाम् ॥ ६ ॥
यशोदयाशीलरूपमाधुर्यैरपि सर्वतः ।
स बालोऽपि पुमान्वृद्धः साधुवृन्दावने रतः ॥ ७ ॥
आरभ्यते महत्कार्यं यैः क्षुद्रैरपि पार्थिवैः ।
ते चक्रवर्तिनो भूत्वा जायन्ते भद्रभाजनम् ॥ ८ ॥

वशीकरोति पुरुषः समस्तानपि दानवान् ।
स्वमहिम्ना तथा हन्ति समस्तानपि दानवान् ॥ ९ ॥
नित्यमुत्कटदानानां भद्राणां स्तम्भमुज्झताम् ।
नृपाणां च द्विपानां च पुरः स्तोत्रं नहि प्रियम् ॥१०॥
इनः स एव सेव्यो यः स्वालोकेन सुधामुचा ।
द्विजेन्द्रमण्डलं क्षीणं समग्रयति संपदा ॥ ११ ॥
विलक्षणतया राजा बाल एव भृशोज्वलः ।
लब्ध्वा वृद्धिं प्रतिकलं भात्यखण्डितमण्डलः ॥ १२ ॥
मन्त्रप्रभावसंपन्ना ये नरेन्द्राः समाहिताः ।
तुदन्त्यहिभयं नित्यं विना दण्डोद्यमेन ते ॥ १३ ॥
यः क्षये वर्तमानः सन्पाति पुण्यजनान्धनी ।
लोके मनुष्यधर्माणं किंनरं कथयन्ति तम् ॥ १४ ॥
परमस्येव पुंसोऽस्य नित्यं श्रीरनपायिनी ।
सारं सदाशयेनेह साधुचक्रं बिभर्ति यः ॥ १५ ॥
भूपालः करवालश्च योगे क्षेमे च स प्रभुः ।
यः प्रसन्नो मुक्तकोशः प्रत्यर्थिजनदानवान् ॥ १६ ॥
निशातमसिमूढं च करेणोल्लासयन्रिपोः ।
कबन्धोत्पातको राजा राजते जलधेरिव ॥ १७ ॥
अमन्दतरवार्युग्रधाराहतमहीभृतः ।
चित्रचापधरा वीरा विद्योतन्ते घना इव ॥ १८ ॥
भुङ्क्ते यस्य सदा भूरि जीवनं वाडवः शुचिः ।
स नदीनः प्रभुर्नित्यं दुर्लङ्घ्यामश्नुते दशाम् ॥ १९ ॥
महान्स एव पुरुषो यस्य सत्यानुरोधिनः ।
आक्षिप्तपारिजातेन बाहुना रक्ष्यते जगत् ॥ २० ॥
अजन्यकम्पाः शूरा ये नित्यमप्यपराङ्मुखाः ।
दर्शयन्त्यपरागेण परेभ्यश्चित्ररूपवत् ॥ २१ ॥

यत्र स्मृतेऽपि नारीणां निर्वृतिं लभते मनः ।
स दर्पकोपमानानां सीमापुरुष उच्यते ॥ २२ ॥
स एव केवलः कर्णः श्रेयानङ्गेषु शस्यते ।
यः कुण्डलस्य वहनात्त्यागेनैव प्रकाशते ॥ २३ ॥
गम्भीरं यत्प्रसन्नं च धनिनां मानसं महत् ।
द्विजानामुपकाराय शुचिना केन निर्मितम् ॥ २४ ॥
कर्णलङ्घिगुणोत्कर्षा वदान्या धन्विनो यथा ।
निष्फलान्न विमुञ्चन्ति मार्गणान्समितौ स्थिताः ॥ २५ ॥
शक्तः शब्द इवैकः स्यात्साधुश्रुतिपदे स्थितः ।
सदध्याहारपूर्णस्य स्वार्थस्य प्रतिपादने ॥ २६ ॥

इति कविराक्षसकृतौ सूक्तिसंग्रहे सुराजपद्धतिः प्रथमा समाप्ता ॥ १ ॥

द्वितीया पद्धतिः ।

उदयं प्राप्य तीक्ष्णत्वाद्दुःप्रेक्ष्यत्वमुपेयुषः ।
पादान्तिके वसुमतो नहि मानी निषीदति ॥ १ ॥
अनुवेलं निहन्यन्ते यस्य सिन्धोरिवोद्यमाः ।
तं प्रमथ्य श्रियं कोऽपि विपक्षो भूभृदुद्धरेत् ॥ २ ॥
आक्रम्य यस्य दोर्दण्डमरिचक्रं प्रकाशते ।
प्राप्नोति पुरुषो लोके स वैकुण्ठ इति प्रथाम् ॥ ३ ॥
प्रभावमीश्वरस्यापि कोदण्डेन निवारयेत् ।
प्राप्नोति विजयश्लाघां नरः पौरुषमाश्रितः ॥ ४ ॥
बलिना विद्विषे पुंसे पदं दीयेत चेद्भुवि ।
महत्त्वं प्राप्य स्वल्पोऽपि विक्रमेण श्रियं हरेत् ॥ ५ ॥
स्वस्थानादवरोप्येत बलात्पुंसा परेण यः ।
अपारिजातं न प्राहुः पार्थिवं पादपं च तम् ॥ ६ ॥
विरसप्रकृतिर्भूपः सत्त्ववानपि सिन्धुवत् ।
राज्ञा स्वान्तसमुत्थेन क्षोभ्यते मृदुनापि सः ॥ ७ ॥

यस्य राज्ञो नवसुधा सेव्या सुमनसां गणैः ।
ध्रुवं बहुलदोषोत्थः क्षयः स्यात्तस्य मण्डले ॥ ८ ॥
अधः कुर्वन्प्रजाः सर्वा बहुधा महिमोल्बणाः ।
राजा पर्वणि कस्मिंश्चिद्भवेदहिभयाकुलः ॥ ९ ॥
महता करतापेन सर्वं वसु सतां हरन् ।
संपूर्णोऽप्यश्नुते राजा कलया क्षयमन्वहम् ॥ १० ॥
यो हीनस्य प्रभावेण राजा सन्परिभूयते ।
स तु न क्षत्रगोष्ठीषु तेजस्वीति प्रकीर्त्यते ॥ ११ ॥
दत्वा वारं जनाय स्वं दिक्षु गर्जन्ति ये मुहुः ।
तानुत्सेकवतः प्राप्य नन्दन्ति न वनीपकाः ॥ १२ ॥
कुमुदैश्च कुभूपैश्च वनसंकुचितैरपि ।
प्राप्यते सुविकासश्रीराभिमुख्यं गते विधौ ॥ १३ ॥
भूभुजामम्बुजानां च पत्रकोशवतामपि ।
दोषान्वयाद्व्यसनिनां संकुचन्ति ध्रुवं श्रियः ॥ १४ ॥
भिक्षाशनो विषादी च सुहृद्यश्च धनेशितुः ।
न स्तूयते किंपुरुषैरपदानकरः सदा ॥ १५ ॥
क्षिपन्तं मार्गणान्रोषात्कृत्रिमं लुब्धमीश्वरम् ।
प्रपद्य न फलस्याप्त्यै कल्पते कोऽप्यफाल्गुनः ॥ १६ ॥
एकक्षितिभृदुत्पन्नाः सच्छिद्राः कण्टकोल्बणाः ।
मिथः संघर्षणाद्वंशा दह्यन्ते साधुशाखिभिः ॥ १७ ॥
दण्डे च कण्टकाक्रान्ते कोशे च प्रथितो नृपः ।
नालं जेतुं कुवलयं मित्रेऽप्यसति पद्मवत् ॥ १८ ॥
वृताः सर्वासुहृद्भिर्ये द्विजिह्वैर्जिह्मगामिभिः ।
दुर्भूभृतो न सेव्यास्ते जनैर्जीवनकाङ्क्षिभिः ॥ १९ ॥
जडेन राज्ञा लब्धेऽपि सकले निजमण्डले ।
विरोध्याक्रम्य गृह्णीयात्तं कदापि महत्तमः ॥ २० ॥

द्विपाश्च दुरमाल्याश्च प्रवृद्धा यत्र भूभृति ।
तस्यैव शृङ्गभङ्गाय मदात्परिणमन्ति हि ॥ २१ ॥

इति कविराक्षसकृतौ सूक्तिसंग्रहे कुराजपद्धतिर्द्वितीया समाप्ता ॥२॥

तृतीया पद्धतिः ।

गुणदोषौ बुधो गृह्णन्निन्दुक्ष्वेडाविवेश्वरः ।
शिरसा श्लाघते पूर्वं परं कण्ठे नियच्छति ॥ १ ॥
गुणिनो वृत्तविमला महावंशप्रसूतयः ।
मुक्तामयाः प्रकाशन्ते नरा हारा इवोज्ज्वलाः ॥ २ ॥
साधुसंतानभाजो ये सन्तः संश्रितनन्दनाः ।
न ते मुञ्चन्ति पञ्चत्वेऽप्यौदार्यं स्वर्द्रुमा इव ॥ ३ ॥
स्वयं क्षोभमुपेत्यापि परानामोदयन्ति ये ।
भद्रश्रियस्ते जायन्ते स्वगोत्रस्य प्रसिद्धये ॥ ४ ॥
मुञ्चन्तश्चापलरुचिं ये स्थिताः पावने पथि ।
घना इवार्द्रहृदयाः प्रयतन्ते दिगन्तरम् ॥ ५ ॥
प्रकृष्टजातरूपश्रीर्मानेन च महत्तरः ।
एक एव महार्घेषु भवेत्सर्वोत्तरो भुवि ॥ ६ ॥
मणयः सुधियश्चापि निसर्गोदग्रतेजसः ।
अन्तस्त्रासेन निर्मुक्ता राज्ञां स्युर्हृदयंगमाः ॥ ७ ॥
मुक्तामृणालसुधियां निर्मलानां निसर्गतः ।
क्षुद्रं यदि स्याद्यच्छिद्रं तद्गुणैरपिधीयते ॥ ८ ॥
विवृण्वन्ती पुरस्तैक्ष्ण्यं पृष्ठतः कुर्वती गुणान् ।
कर्णान्विध्यति लोकस्य सूची वा सूचकस्य वाक् ॥ ९ ॥
महागोत्रेषु संजाता मृदवो येऽपि ते घनाः ।
स्वजीवनव्ययेनापि बहुधान्योपकारिणः ॥ १० ॥
भुवनोत्तरकल्पानां भोगेष्वन्यभिचारिणाम् ।
केदाराणां प्रकृष्टानां न तृप्यन्ति कुटुम्बिनः ॥ ११ ॥

प्रासादातिशयेनाशु विस्फुरत्सर्वसंपदः ।
नदीनां भङ्गवन्तोऽपि साधवः सिन्धवो यथा ॥ १२ ॥
पार्श्वे बसन्तं कामेषु साधकं सहचारिणम् ।
दृष्ट्वापि कः पुमान्हृष्यन्नालपेन्मधुरां गिरम् ॥ १३ ॥
अशेषचक्षुःश्रवणं प्रतिकूलो भवन्नपि ।
विनतानन्दहेतुर्यः स पुमानात्मनन्दनः ॥ १४ ॥
शब्दशक्त्यैव कुर्वाणा सर्वदानवनिर्वृतिम् ।
काव्यविद्या श्रुतिगता स्यान्मृतस्यापि जीविनी ॥ १५ ॥
अनेकवर्णपदतां वाग्विद्युदिव बिभ्रती ।
अभ्रान्तेषु सदा सारसङ्गिषु स्यात्स्फुरद्गुणा ॥ १६ ॥
गूढभावास्पदत्वेन यदनादेयवद्भवेत् ।
न जानते तत्कवयो गूढं सारस्वतामृतम् ॥ १७ ॥
क्षीणस्नेहो निशान्तेषु मुञ्चन्स्वां जनसंहतिम् ।
आत्मन्यात्मरुचिर्योगी निर्वाणं याति दीपवत् ॥ १८ ॥
निर्मुक्तभोगशुचिता क्षमया मूर्ध्नि संगतिः ।
महिम्ना चाप्यहीनत्वं न ह्यशेषस्य विद्यते ॥ १९ ॥
पश्यन्मध्यस्थया दृष्ट्या कामं द्वयन्तमप्यरिम् ।
अनङ्गीकृत्य यः शाम्येत्सत्यमीश्वर एव सः ॥ २० ॥
योगिधीरर्कदीप्तिश्च प्राचीनतमसः क्षयात् ।
क्रमाद्दीप्त्या परां काष्ठां याति कामं विहायसा ॥ २१ ॥

इति कविराक्षसकृतौ सूक्तिसंग्रहे सुजनपद्धतिस्तृतीया समाप्ता ॥३॥

चतुर्थी पद्धतिः ।

अलकाश्च खलाश्चैव मूर्ध्नि भीरुजनैर्धृताः ।
उपर्युपरि सत्कारेऽप्याविष्कुर्वन्ति वक्रताम् ॥ १ ॥
गुणानार्तिपरान्नीत्वा धनिनो धन्विनो यथा ।
निघ्नन्ति हृदयं दृप्ता विदुषां विद्विषामिव ॥ २ ॥

महाप्रभञ्जनं प्राप्य स्वान्तेषु कलुषीकृताः ।
प्रतिकूलं विचेष्टन्ते नीचाः केऽपि जडाशयाः ॥ ३ ॥
प्रियार्थतृष्णामापाद्य विप्रलम्भेन खेदयन् ।
विनापि विग्रहं लोकान्कामवद्बाधते खलः ॥ ४ ॥
पुरुषा विवरं प्राप्य केऽप्यलक्षितसंभवाः ।
शोषयन्ति महावंशान्मुखे तीक्ष्णा घुणा इव ॥ ५ ॥
अदाक्षिण्यादतीवोग्राः पवना इव दुर्जनाः ।
गुरूनपि प्रतिक्षेप्तुं प्रयतन्ते क्षमाभृतः ॥ ६ ॥
मूर्खाश्च मुकुराश्चैव भृशं भूत्यवलेपिनः ।
परेषामनुरूपाणि विपर्यासेन गृह्णते ॥ ७ ॥
मधुव्रताश्च मूर्खाश्च रजसा रूक्षतां गताः ।
नित्यमाक्रम्य गृह्णन्ति सारं सुमनसां मुखात् ॥ ८ ॥
आसाद्य मन्दरागोऽपि भुजंगेनातिसंगतिम् ।
तद्भोगात्तु भ्रमन्कष्टं प्राप्नोति विषमन्ततः ॥ ९ ॥
दुर्भृत्यो दुरुपानच्च प्राप्यापि स्नेहसक्रियाम् ।
स्वामिनः पदभङ्गाय स्वकाठिन्येन कल्पते ॥ १० ॥
अपथेनैव यो मोहादधः सारायते स्वयम् ।
नीचोपसर्पणवशात्स पतेद्वंशवानपि ॥ ११ ॥
मन्दतीक्ष्णरुचिः पापः कुजन्मा यच्च देहिनाम् ।
दुःखाय जन्म भजते निधनं चेति विस्मयः ॥ १२ ॥
जनित्वाप्युन्नते वंशे वक्राः केचन कण्टकाः ।
कुर्युर्जनपदक्लेशं साधुमार्गस्य दूषकाः ॥ १३ ॥
स्वपक्षमवधुन्वन्तः परानाशु विशन्ति ये ।
गुणोज्झितत्वात्तेभ्योऽपि च्यवन्तेऽत्र शरा इव ॥ १४ ॥
नित्यमक्षिगतस्यापि दुर्जनस्याञ्जनस्य च ।
न लक्षयितुमाकारः शक्यः स्यात्स प्रवेशतः ॥ १५ ॥

नौश्च दुर्जनजिह्वा च प्रतिकूलं विसर्पिणी ।
प्रतारणाय लोकानां दारुणा केन निर्मिता ॥ १६ ॥
लक्षयित्वैव लुब्धेशाः किंचिद्रूपं भयानकम् ।
मार्गणानां प्रवर्तन्ते क्षयायानपराधिनाम् ॥ १७ ॥
नीतोऽप्यभ्यन्तरत्वेन जनैः प्राणसमानताम् ।
खलो वायुरिवारूपो दुर्ग्रहः स्पर्शनं विना ॥ १८ ॥
मृदवोऽपि सदामोदहेतवोऽप्यमला अपि ।
नातिश्लाघ्याः समनसो जनैर्जातिविवर्जिताः ॥ १९ ॥
कृपणेन कथंकारं कृपाणः सह गण्यते ।
परेषां दानसमये यः स्वकोशं विमुञ्चन्ति ॥ २० ॥
जडाशयस्य हृदये कामः सोम इवोत्थितः ।
बह्वीरपि क्षपाः प्राप्य क्षयं याति नभोगतः ॥ २१ ॥
भ्रमेण महितं नीचैर्गत्वादाय तु जीवनम् ।
क्षेत्रे दत्ते घटीयन्त्रमक्षेत्रे बालिशो जनः ॥ २२ ॥

। कविराक्षसकृतौ सूक्तिसंग्रहे कुजनपद्धतिश्चतुर्थी समाप्ता ॥४॥

पञ्चमी पद्धतिः ।

बाल्ये कामप्रवृद्धस्तु वृद्धः स्यादधिको जडः ।
खान्ते च कृष्णरूपश्चेत्पूज्यो राजा द्विजन्मिनाम् ॥ १ ॥
शुचेर्यस्य द्विजेन्द्रस्य हृदयं हरिणाश्रितम् ।
विराजति पदे विष्णोरतिक्रम्याशुभानि सः ॥ २ ॥
क्षुद्रान्हित्वा सवयसोऽप्यप्रसन्नाञ्जलाशयान् ।
विप्रस्थितो हंस इव प्राप्नुयान्मानसं शुभम् ॥ ३ ॥
वसन्नप्यवदातानां द्विजानां सविधे सदा ।
रागानुबन्धमधरो न कदाचिद्विमुञ्चति ॥ ४ ॥

द्विजेन्द्रोऽपि कलाढ्योऽपि कामचारी भवेत्सदा ।
नित्यं निमज्जन्नप्यब्धौ नान्तःशुद्धो भवत्यलम् ॥ ५ ॥
वेदत्रयमयो यः स्यात्सोऽपि हीनः क्षणाद्भवेत् ।
स्वस्यैव रुच्या पीतायां वारुण्यां सत्पथाच्युतः ॥ ६ ॥
देवाश्च भूमिदेवाश्च नित्यमप्यमृताशनाः ।
ह्रीयन्ते स्वाधिकारात्ते ये सेवन्ते नवासवम् ॥ ७ ॥
दृष्ट्वाग्रे भूमृतः कन्यां शमस्थोऽपि विकारवान् ।
अतनुं कामनामानन्वनष्टात्मेत्युच्यते बुधैः ॥ ८ ॥
द्विजः सुमनसो हित्वा भृङ्गवदानलिप्सया ।
आश्रयन्नृपमातङ्गान्सीदेच्छ्रुतिनिषेधतः ॥ ९ ॥
अधिगम्याशु गोलक्षमेकः शाम्यति मार्गणः ।
अनुरोधस्थिरतया न च शक्यप्रतारणा ॥ १० ॥
साध्वी सरिच्च पत्नौ स्याद्विरसेऽप्यपराङ्मुखी ।
पितृपत्यभिगुप्तापि या लङ्घा धवगामिनी ।
सर्वदैव क्रियानर्हा सा स्त्री दिगिव दक्षिणा ॥ ११ ॥
कविविद्यादुराधर्षो यो राक्षस इवापरः ।
दक्षिणस्थो लब्धवर्णो विख्यातः कविराक्षसः ॥ १२ ॥
प्रसादार्थं सुमनसां संतोषार्थं सभासदाम् ।
पाण्डित्यं ख्यापयंस्तेन कृतोऽयं सूक्तिसंग्रहः ॥ १३ ॥

इति कविराक्षसकृतौ सूक्तिसंग्रहे प्रकीर्णपद्धतिः पञ्चमी समाप्ता ॥५॥

समाप्तोऽयं ग्रन्थः ॥